स्युनावीतदागृहस्थैः पूर्वायतिभिरुत्तरा कार्या । प्रवृत्तमहतिसंपूर्णाव्याप्याहता
वा पुनाहादश्याचतथातानदृश्यते पुनरेव च । पूर्वा कार्या ... यतीति भ्वा

॥श्रीः॥
॥२८॥

तराविद्धोऽशतिस्कांदोक्तेः। उभयपक्षेषु शुद्धा विद्धा वा सर्वेषां परे संपूर्णैकादशीयत्नतः
ज्ञातपुनर्वसु। सर्वैरेवोत्तराकार्या परतो द्वादशी यदि इति नारदोक्तेः। द्वादशीमात्रवृद्धौ
शुद्धाप्यपूर्वा त्यक्त्वैकादशी विद्धा द्वादशी परतः स्थिता। उपोष्यैकादशी तत्र यदीच्छेत्पर
मं पदमिति नारदोक्तेः। द्वादशीमात्रवृद्धौ तु शुद्धा विद्धा व्यवस्थिते। शुद्धापूर्वोत्तरा विद्धा समा
प्तौ निर्णय ईदृशः इति माधवकौस्तुभे। मदनरत्नेप्येवं॥ यत्तु विद्धाप्यविद्धा विद्धा
पापरतो द्वादशी न चेत्। अविद्धापि च विद्धा स्यात्परतो द्वादशी यदि इति हेमाद्रौ पाद्मवच
नं तदेकादश्या वृद्धौ ज्ञेयं। तदुक्तं माधवेन॥ एकादशी द्वादशी चेत्पुनश्च वर्धते यदा।
तदा पूर्वदिने त्याज्यं स्मार्तैर्ग्राह्यं परं दिनमिति। विद्धैकादश्यां द्वादशीमात्रवृद्धौ च
सर्वेषां परैव। तत्रैवैकादशीमात्रवृद्धौ गृहिणः पूर्वा यतेरुत्तरा॥ पूर्वोक्तपाद्मोक्तेः॥ एकादशी
विद्धा चेद्वृद्धौ वृद्धौ विशेषतः। उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही इति चेत् सोक्तेः। एतच्छु
द्धाविद्धातुल्यमिति माधवः। त्रयोदश्यां न लभ्यते द्वादशी यदि किंचन। उपोष्यैकादशी त
त्र दशमीमिश्रितापि चेति स्कांदात्। अविद्धानि निषिद्धे चेन्न लभ्यते दिनानि द्वौ। मुहूर्तैः

पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिरिति कण्वस्मृतेर्गोभिलोक्तेश्च। मुहूर्तपंचकमरुणोदयमारभ्यो
ज्ञेयं। अन्यथा तत्र द्विरेकादश्या ग्रावाऽसंभवात्। यद्यपि हेमाद्रिणा शुद्धसमा शुद्ध
न्यूना वाधिकद्वादशीका चेत्सर्वेषां परेत्युक्तं तदपि विद्धविषयं। समानेनात्र पूर्वेकसावि
रोधः॥ हेमाद्रिमतमुच्यते॥ तत्र शुद्धा विद्धा द्वयी नंदा त्रेधा न्यूनसमाधिकैः। षट्प्रकारा
पुनश्चैषा द्वादश्यूनसमाधिकैः। स्यादष्टादशैकादशीभेदाः। तत्र शुद्धाधिका न्यूनद्वादशीका
धिकसमद्वादशीका च सप्तमः पूर्वा निष्कामैस्तु उत्तरा कार्येति हेमाद्रिः। मदनरत्ने तु शुद्धाधिकापर
रा। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा इति पूर्वोक्तेः॥ अन्या पूर्वा॥ शुद्धस्य यदसमा हीना समा हीना धिको त्तरा।
एकादशीमुपवसन्न शुद्धां वै कदाचनापि तिस्कांदात्। शुद्धाप्येकादशी। उत्तरा द्वादशी न चेद
कादशी विद्धा इति नारदोक्तेश्च॥ अयं तु अविद्धापि विद्धा स्यादिति पाद्मोक्त शुद्धाकापरं।
यत्तु संपूर्णैकादशी स्यात्पुरतो द्वादशी यदि। उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारण
मित्यादि तद्वैष्णवपरं। समानानां तु पूर्वैव शुद्धे। शुद्धन्यूना शुद्धाधिका शुद्धसमा। विद्धन्यूना।
विद्धसमा वाधिकद्वादशीका चेत्सर्वेषां परैव। प्रथमे हानि संपूर्णा निष्प्रवृत्तिरिति स्कांदात्। ऊ

॥श्रीः॥
॥२८॥

नद्वादशीकार्यातु। विष्णुप्रीतिकामैस्तूपवासद्वयं कार्यं। संपूर्णैकादशी यत्र प्रभाते पुन
रेव सा। [illegible] तत्र द्वादशी तस्मिन्नुपवासः कथं भवेत्। उपोष्ये द्वे तिथी तत्र विष्णुप्रीण
नतत्परैः [illegible] वृद्धवसिष्ठोक्तेः। विद्धन्यूनासमद्वादशीकोऽमुमुक्षूणां पूर्वव्रतं चापरां [illegible]
न्येषां पूर्वा [illegible] परतोपि पूर्वेति मदनरत्ने। विद्धन्यूनान्यूनद्वादशिका च सैव सर्वैः का
र्येति हेमाद्रिः। मुमुक्षूणां परान्येषां पूर्वेति मदनरत्ने। विद्धसमासमद्वादशिका
नद्वादशिका च मुमुक्षुभिः परान्यैः पूर्वा कार्या। दशमीमिश्रिता पूर्वा द्वादशी यदि
लुप्यते। तदैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिरिति व्यासोक्तेः। मोक्षकांक्षि
गृहिणा [illegible] न्येषां पूर्वैव। सर्वैरेकादशी कार्या द्वादशी मिश्रिता नरैः। प्रातर्भव
द्वा माघायते नित्यमुपोषणमिति पाद्मोक्तेः। विद्धाधिकासमद्वादशिकाधिकद्वादशि
का च सर्वेषां परैव। पारणाहे न लभ्येत द्वादशी कलयापि चेत्। तदानीं दशमीविद्धाप्यु
पोष्यैकादशी तिथिरिति ऋष्यशृंगोक्तेश्च। मध्वमते तु अरुणोदयवेधः सर्वोपयतो ज्ञेयः।

विद्धाधिकन्यूनद्वादशिका मोक्षपापक्षयविष्णुप्रीतिकामैः परा कार्या। गृहस्थेन तु नक्तं
कार्यं। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति
कौर्मे दिनक्षये उपवासनिषेधात्। दशम्येकादशी विद्धा द्वादशी च क्षयं गता। स्मी
णा सा द्वादशी ज्ञेया न कैश्च गृहिणः स्मृतमिति हेमाद्रौ शातातपोक्तेश्च गृहिणः पूर्व
योपवासः। एकादश्याः शुद्धान्यूनत्वे तु हसमत्वे वा द्वादश्याः न्यूनसमत्वयोर्न
कादश्यामुपवासः। यानि तु देशाम्यनुगतानीति द्वादशी द्वादशीष्फुटौ धर्मा
पत्यधनार्थं विश्वयोदश्यां तु पारणमिति कौर्मी दीनि दशम्यां विद्धत्रयोदशीपार
णयोनिषेधकानि तानि विहितानि भिन्नपराणि। अत्र मूलवचनानि तद्व्यवस्था चा
कनादेया। यत्तु कालहेमाद्रौ। बहुवाक्यविरोधेन संदेहो जायते यदा। द्वादशी तु तदा
ग्राह्या त्रयोदश्यां तु पारणमिति मार्कंडेयोक्तेः। संदिग्धेषु च वाक्येषु द्वादशी समुपोषय
त् तथा विवादेषु च सर्वेषु द्वादश्यां समुपोषणं। पारणं च त्रयोदश्यां माङ्गेयमामकेऽनर
तिथा नोक्तेश्च। विधसंदेहे ज्योतिर्विदो विप्रतिपत्तौ वा पञ्चाकार्यं तु लेतविल्लवीविषय मित्य

श्री: ३०

केवकुना। अथात्रोपयुक्तं किंचिदुच्यते तत्र दशम्यामेकादशीयोगे दशमीमध्याह्नवर्ज्यो
जनं कार्यं। एकादश्यां न भुंजीतेति निषेधस्यैव निमित्तत्वात्। निषेधस्तु नित्यत्वात् काम्यस्मा
त्रमपेक्षत इति देवकोले श्राद्धे चितु एकादशीव्रतांगत्वेन पूर्वेद्युरेकभक्तविधानादिविशिष्ट
देचूनिषेधो न वैकादश्यां नित्यकाम्यव्रतांगे भोजननिषेधः प्रवर्त्तते तेन पूर्वदिने एकादशी
मध्येपि भोजनमित्याहुः अत्राधिकारी माधवीये कात्यायनेनोक्तः। अष्टवर्षाधिको
मर्त्यो ह्यशीतिन्यूनवत्सरः। एकादश्यामुपवसेत्पक्षयोरुभयोरपि॥ भविष्ये ब्रह्म
चारी च नारी च शुक्लामेव सदा गृही इति यत्तु विष्णुः पत्यौ जीवति या नारी उपोष्य व्रत
माचरेत्। आयुष्यं हरते भर्तुर्नरकं चैव गच्छतीति तद्भर्त्रननुज्ञाविषयमिति प्रागुक्तं।
उपवासासामर्थ्ये तु मार्कंडेयकौर्मयोः। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासे
न दानेन निर्द्वादशिको भवेत्। अत्र एकभक्तेन यो मर्त्य उपवासव्रतं चरेत् दिवसे [illegible] द्वि उ
पवासत्राबुसतहमी। चंतिदेशार्थः। तत्प्रयुक्तः सर्वधर्माः संकल्पमंत्रे चैकभक्तादिपदेना
हः कार्य इति मदनरत्ने। तथाऽसामर्थ्ये जातेनिधिनाकार्यो द इति प्राग्वक्तं। अत्राऽकरणप्राय

श्री: ३०

श्चित्तमह माधवीये कात्यायनः। अर्कपर्णद्वयेनात्रो [illegible] सप्तमीव्रतदिने। एकादश्यामहो
रात्रे उक्तं चांद्रायणं चरेत् इति अथ व्रतीव्र [illegible] लघुनारदीये दशम्यादिम
ह्नीपालो त्रिदिनं परिवर्जयेत्। गंधतांबूलपुष्पादि स्त्रीसंभोगं महायत्नतः। तत्र दशम्यां विधि:
कौर्मे। कांस्यं मांसं मसूरांश्च चणकान्कोरदूषकान्। शाकं मधु परान्नं च त्यजेदुपवसन्स्त्रि
यं तथा शाकं मांसं मसूरांश्च पुनर्भोजनमैथुनं। द्यूतमत्यंबुपानं च दशम्यां वैष्णवस्त्य
जेत्। व्रतघ्नान्याह हेमाद्रौ देवलः। असकृज्जलपानाच्च सकृत्तांबूलचर्वणात्। उपवासः प्र
णश्येत दिवास्वापाच्च मैथुनात्। अत्राकौतुमदनरत्ने देवलः। अत्यये चांबुपानेन नो
पवासः प्रणश्यति अत्रैवैकर्द विष्णुरहस्ये गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं।
व्रतस्थो वर्जयेत्सर्वं यच्चान्यन्न निराहृतं। मदनरत्ने नारदीये। अक्षारलवणाः सर्वे
हविष्यान्ननिषेविणः। अवनितल्पशयनाः प्रियासंगविवर्जिताः। एषु प्रायश्चित्तमुक्तं निर्णया
मृते संग्रहे तेन हिंसकयोः सरव्युत्तरास्तेन्यं च हिंसनं। प्रायश्चित्तं व्रती कुर्यात् जपन्नाम शत
त्रयं। मिथ्याध्यावादे दिवास्वापे बहुशः अंबुनिषेवणे। अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शु

चिः। ॐ नमो नारायणायेत्य[illegible] तन्नैवेद्यं [illegible] तांबुल[illegible]संकेतेष्वा
सन्निधेरणे। व्रतलोपो न चेत्[illegible]नमिति। संध्यांग[illegible] उक्तकालादन्यत्र न
तः सेकात्मस्त्रीमूत्र[illegible]यः स्मृत इति त्रिकांडकात्यायनोक्तेः। हेमाद्रौ वसिष्ठः उपवासे
तथा श्राद्धे न कुर्यात् दंतधावनं। दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं। काष्ठग्रहणान्मृल्लो
ष्टयोर्न निषेध इति हेमाद्रिः। [illegible]रहस्ये श्राद्धोपवासदिवसेऽपि दिलादंतधावनं। गायत्र्या
शतसंप्लुतमंबु प्राश्य विशुद्ध्यतीति। निर्णयामृते व्यासः। वर्जयेत्पारणमासं व्रतांते[illegible]
देति। एकादश्यां श्राद्धप्राप्तौ माधवीये कात्यायन आह। उपवासो यदा नित्यः श्राद्धं नैमित्तिकं
भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितं। मातापित्रोः क्षयेऽप्राप्ते न वेद[illegible]कादशीं यदि। आस्य
यी पितृदेवाश्च आजिघ्रेत्पितृसेवितमिति। हेमाद्रावादिसर्वनिबंधेष्वप्येवं। एतेनैकादशीनि
मित्तके श्राद्धे द्वादश्यां कार्यमिति वदंतः परास्ताः। किंच महालये सपिंडकः सकलपूज्यः श्राद्ध
[illegible]कश्राद्धे प्रतीतिः [illegible] पौषे कादश्यां च मन्वादिश्राद्धे [illegible] परिज्ञाने च त्स्ये सकादश्यां
विहितं श्राद्धं बाधितं नैव न्यरयात। यदपि स्मृतिचंद्रिकायां पठेदि[illegible] अन्नाश्रितानि पापानि तदन्नु

श्रीः
३१

श्रीः
३१

[illegible]रेवसामज्जंति पितरस्तस्य नरके शाश्वतीः समा इति तस्य पित्राग्रह[illegible]जिजेगे नरस्यैवे[illegible]
[illegible]न्यतामहं श्राद्धसमिस्य वे। योपि अहृत[illegible] निःचयाज्जकपिंडं विना [illegible]तिलघु
[illegible]येकादश्यां श्राद्धनिषेधः समाता पितृलीनविषयः पूर्वदा[illegible] निःचयस्तु
निग्रहः अवृतघ्नान्याह मदनरत्ने देवलः सर्वभूतभयं व्याधिः प्रसादो गुरुशासनं अ
व्रतघ्नानि प्रथितेसद्भिः[illegible]नि शास्त्रतः स्कांदेपि अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं प
[illegible] हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं इदं चानिसंकट[illegible] विषयं अनुकल्पानृणां पत्तिः
[illegible]वणिनि मूलं फलं पयस्तोयं सुपवास[illegible] नत्वेव[illegible]जने[illegible]
[illegible]पवदन् शयने च मदुच्चाने मत्या[illegible] परिवर्तिते नरा मूलफलाहारी हरि
[illegible]विनोपि विनोति निर्णयाः सर्वव्रतेषु ज्ञेयाः। त[illegible]पासंकल्पः
मुदङ्मुखः उपवासं तु गृह्णीयाद्यद्वा[illegible] वचनयेदिति माधवीये
वाना[illegible] इत्तः एकादश्यां नि[illegible] निपुंडरी
काक्ष ग्रंरण[illegible] ती शैवादिनातु हेमाद्रौ सौरपुराणे सानि[illegible]यवानोन्ना

संकल्पं तु समाचरेत्॥ रात्रौ गायत्र्यो यजुर्वेदे प्रसिद्धा॥ बोधायनेन तौ। विष्णुर्ज्ञानुच्छीजोकिंम
र्पयेत्॥ ततस्तोयं दिवेत्॥ महासारेण मंत्रेण जिनेनानेन मंत्रितं॥ उपवासफलं प्रेप्सुः पिबेत्
चगतजलमिति कात्यायनोक्तेः॥ मध्यरात्रे द्वयेवाहन्नामाविधेयात्रौ संकल्प इति माधवः॥ विद्वाप
दात नभ्रस्त ऽनंतस्य कौस्तुभ समाहितः। माज्ञ्यो पूजयेद्धि शुं संकल्पं च ततश्चरेदिति नारदीयोक्तेः॥
तत्रैव पूह ... नकुलस्य कौ समाहितः॥ ... पूजयेद्धि सुं संकल्पं च ततश्चरेत्॥ द्वादश्यां निवेदनमंत्रोक्तेः
श्रीः ...मभिख्याय्य देवस्य हननतः कुर्याज्जागरं नियतो व्रती॥ द्वादश्यां निवेदनमंत्रोक्तेः
...त्यानेन॥ अज्ञानतिमिरांधस्य व्रतेनानेन केशव॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो
श्रीः ३२ भवेति॥ द्वादश्यां च वर्ज्यान्याह बृहस्पतिः॥ दिवानिद्रां परान्नं च पुनर्भोजनमैथुने॥ क्षौ श्रीः ३२
द्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्॥ परान्नस्य क्वचिदपवादः स्मर्यते॥ भ्रद्धा
न्नं गुरोरन्नं मातुलान्नं तथैव च॥ पितृव्यभ्रातृपुत्राणां परान्नं नैव दोषकृदिति हेमाद्रौ
अन्नो ऽपुनाणो॥ पुनर्भोजनमध्यायो भाराक्रायासमैथुनो॥ उपवासफलं हन्युर्दिवानि
द्रा च पंचमी॥ स्कांदे॥ परान्नं कांस्यं तिलं लोभं वितथं भाषणं वर्जयेदिति विशेषः॥ विष्णु
धर्मे॥ असंभाष्यान्हि संभाष्य तुलस्यमलकादलं॥ आमलक्याः फलं वापि पारणे

आदपश्च ...ति॥ एतद्व्रतं सूतकेपि कार्यं॥ सूतके मृतके वापि न त्याज्यं द्वादशीव्रतमिति विष्णु
क्तेः॥ दानादि सूतकांते कार्यं॥ सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं॥ दानं दत्वा विधा
नेन व्रतस्य फलमश्नुत इति मात्स्योक्तेः॥ रजोदर्शनेपि कार्यं॥ एकादश्यां ...नारद
युनं जस्यापीति पुलस्त्योक्तेः॥ यदा द्वादश्यां श्रवणास्यात्तदा शुद्धामप्येकादशीं त्यक्त्वा
तत्रैवोपवासः कार्यः॥ शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता॥ तयोरेवोपवासश्च
त्रयोदश्यां च पारणमिति नारदीयोक्तेः॥ एते च नियमाः काम्यव्रते न यतः॥ नित्यव्रतेस
तिसंभवे कार्याः॥ अशक्तौ मास्तु पुनः कुर्यान्नियमं सविशेषणमिति कात्यायनोक्तेः॥
अशक्तो तु मा धर्मिया बहु नैवेद्ये इति विज्ञाय कुर्वीत नावश्यमेकादशीव्रतं॥ विशेषनियमा
शक्तो हीनावंशुजिर्वर्जित इति॥ अथाष्टौ महाद्वादश्यः॥ तत्र शुद्धाधिकैकादशीयुता
द्वादशी उन्मीलनी संज्ञा॥ द्वादश्येव द्वादशी ...वर्धा इति चेत्सा वंजुली॥ वासरत्रयस्पर्श
ना त्रिस्पृशा॥ अमापर्वणः संपूर्णाधिक्या पक्षवर्धिनी॥ पुष्य संयुता जया॥ श्रवण
युता विजया॥ पुनर्वसुयुता जयंती॥ रोहिणीयुता पापनाशिनी॥ एताः पापक्षयकारिकाः॥

श्रीः ३३

उपवसेत्। अत्र मूले हेमाद्रौ ज्ञेयं। एकादशीद्वादश्योरशक्तेनैकेनोपवासः पार्थक्येनतु शक्तस्यो
पवासद्वयं। एकादशीमुपोष्यैव द्वादशीं समुपोषयेदिति विष्णुरहस्यात्। अत्राशक्तौ द्वादश्यामुप
एवमेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्। पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति तत्रैवोक्तेः।
यदा त्वल्पा द्वादशी तदोक्तं मदने। यदा भवति अल्पापि द्वादशी पारणादिने। उषःकाले द्वयं कु
र्यात्प्रातर्माध्याह्निकं तदा॥ नारदीयेपि अल्पायामथ विप्रेन्द्र द्वादश्यामरुणोदये। स्नाना
र्चनक्रियाः कार्या दानहोमादिसंयुता इति। संकटे तु माधवीये देवलः। संकटे विषमे प्राप्ते द्वादश्यां पा
रयेत्कथं। अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदिति। अत्र केचिदाहुः अपकर्षवा
क्यान्यनाहिताग्निविषयाणि। आग्निहोत्रादीनां प्रोक्तत्वे नापकर्षायोगादिति। द्वादश्याः
प्रथमपादमतिक्रम्य पारणं कार्यं। द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः। तमतिक्र
म्य कुर्वीत पारणं विष्णुतत्परः इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः। अत्र केचित्ति
गिरते। यदा भूयसी द्वादशी तदापि प्रातर्मुहूर्तत्रये पारणं कार्यं। सर्वेषामुपवासानां प्रा
तरेव हि पारणमिति वचनादिति। अस्मद्गुरवस्तु बहूनां कर्मकालानां विनाऽकरणं वा

श्रीः ३३

धापत्तेः प्रागुक्तवचनेनाल्पद्वादश्यामेवापकर्षविधानापदशाह्न एवकार्यं। प्रातःशब्दस्तु सा
यंप्रातर्द्विजातीनामशनं श्रुतिचोदितमितिवदपराह्नवाचीत्यप्युपपन्नः नचावाक्यवैयर्थ्यं
पुनर्भोजनसायंपारणनिवृत्त्यर्थत्वात्तस्येत्याहुः। प्रमादेनैकादश्युपवासातिक्रमः पनार्के
वाराहे। एकादशी विप्लुता चेद्द्वादशी परतः स्थिता। उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदमिति।
केचित्तु विष्णुना चेदिति पठन्ति। अत्राविरोधिनो नियमाः सर्वव्रतेषु बोद्धव्याः अन्यत्रनवनखिव
स्मृत इति दिक्॥ इति श्रीनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधावेकादशीनि
र्णयः॥ द्वादशी तु पूर्वैव युग्मवाक्यात्। द्वादशी तु प्रकर्त्तव्या एकादश्यायुता प्रभो। इति स्कां
दाच्च। त्रयोदशी तु सर्वमते शुक्ला पूर्वा कृष्णोत्तरा। त्रयोदशी तिथिः पूर्वा सितायामसितः पश्चादिति दी
पिकोक्तेः। शुक्लात्रयोदशी पूर्वा कृष्णात्रयोदशीति माधवाच्च। चतुर्दशी तु सर्वमते कृष्णा पूर्वा शु
क्लोत्तरा। उपवासे तूभयत्रापि परेति मदनरत्ने। पौर्णमास्यमावास्ये तु सावित्रीव्रतं विना परे एव ग्राह्ये। भू
तविद्धे न कर्त्तव्ये दर्शपूर्णे कदाचन। वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात्।
अमायां यागविद्धेयाऽपराह्ने शातातपः। अमावास्यां भवेद्यावद्यदा भूमिस्तत्स्यपरे॥ जाड

वीक्षामात्रेण गोसहस्रफलं लभेत् अमावासोमवारेण सप्तमी। चतुर्थी भौमवारेण। विषुव
वत्सदृशं फलं। तत्रैव व्यासः। सिनीवाली कुहूर्वापि यदि सोमदिने भवेत् गोसहस्रफलं
दद्यात् स्नानं वै मौनिना कृती। हेमाद्रौ बृहन्मनुः। श्रवणाश्विनधनिष्ठार्द्रानागसदैवतमस्त
के। यद्यमा रविवारेण व्यतीपातः स उच्यते। नागदैवतमाश्लेषा। मस्तकं मृगशिरः। प्रथमपाद
इत्यन्ये। स च सर्वेषी अथेष्टिकालाः गोभिलः पक्षांता उपवस्तव्याः पक्षादयो यष्टव्या
इति। उपवासोऽन्वाधानं। तत्र मध्याह्नात्पूर्वं वा पर्वप्रतिपत्संधौ तद्दिने यागः। सर्वाह्णे वा यष्टव्या
कुर्यादि पर्वसमाप्तौ। उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यत इति लोगाक्षिवचनात्। अत्र चेद्वा
विभागः आवर्तनात्पूर्वं कालोपरिष्टात्ततः परः। मध्याह्नस्तत्तयोः संधीयदावर्तनमुच्यत
इति मदनरत्नवचनात्। मध्याह्नादूर्ध्वं संधौ माधवमते परेद्युर्यागः। अपराह्णे थवनात्रेय
द्विपर्वसमाप्यते। उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यत इति ते तेन हेमाद्रिरुक्तपरा
संध्यावणि परदिने प्रतिपच्चतुर्थ्यंशोदये चेत्स्याति द्वितीयादिवस्य तस्य स्यात्तदा पूर्वेद्युर्यागः एवं
गौतमो द्वितीये तु यष्टव्यं द्विजातिभिः। द्वितीयासहितं यस्माद्भूयमंत्याश्वलायनो इति द्विती

श्रीः
३४

ये त्विति केऽनु तिथि कात्यायनेन चतुर्दश्यापरं तु नीयेत्विति शूलपाणौ पाठः स्पष्टार्थ एव। न तु
पा भूतापंचदश्यां प्रयाति द्वितीयास्वयंगामिनी। चतुर्दशी हि समायां स्यादित्येकव्यादि कि
ये तिथौ उनाद्यस्य विवादे। मदनरत्नेपि। चतुर्दश्यां चतुर्यामा अमावास्यां द्वे यतो। श्वोभूते प्रति
पद्येवं स्यात्पूर्वतिथावेव कारयेदिति। यत्तु माधवः यस्तु वाजसनेयी स्यात्तस्य संधिदिना
त्पुनः न कोपन्याहृतिः किं तु सदा स्तु विधिदिने इत्याह। यच्च काकादर्शोप्युक्तो। आव
र्तनादूर्ध्वः संधिर्यदि अन्वाधाय तद्दिने परेद्युरिष्टिरिष्याकुर्वीत वाजसनेयिन इति यच्च म
दनरत्ने मध्यंदिनात्स्यादहनि हि यस्मिन् पर्वणः संधिरियं तृतीया। सा पूर्वविकार्वा
ऽसन्नीयि तस्यामुपोष्य परेद्युरिष्टिरिति एतत्स्याणमासीश्वरमिति तत्रैव। आवर्त
ना ७ त्वर्वाग्यस्तु संधिर्भवेत्तत्रोपवासोऽसह। मध्याह्नादूर्ध्वमाक्रमाश्चावत्तीयत्यर्थः इति केचित्तु दव
ज्ञाने श्री अनंतभाष्यादिसकलतत्कारीयग्रंथविरोधाद्भानादरोपोप्येण्ययौर्णमा
स्यां विशेषमाह कात्यायनः। द्वितीयात्रीमुहूर्तां चेत्प्रतिपद्यपराह्णिकी। अन्वाधा
नं चतुर्दश्यां पञ्चतः सोमदर्शनात् कात्यायनस्य यजनीयेह्नि सोमच्छदानुष्पादिरि

नियत्याः प्रकृतेः परेद्युरिति । र्दस्याम्याद्योप्यवमाकुः । यइथेति सांनरायणिकेतेः पर्वकाला
वादावृत्तनास्वाकसानि ये प्रहते प्रतिपदि समाप्तिर्नियमा नि ह त्यनंतरं [illegible] दिरिक्तस्या
गात्पूर्वेद्युर्विकालि रिस्तु तेन रत्नेयं । सावयिका । यच्चापि प्रकृतेः पूर्वेत्तार दूर्वमनस्यादि सप
स्तेवेनोक्तं तथापि हेतुवादनश्रुतिमूलत्वात्राप्यादेगवासमाके व्याहृतादितिवद्प्रामाण्यमि
त्तिदाश्राय । आग्रयणादु विशेषनस्याम । अन्वारम्भणीयातु चतुर्दश्यां कार्येति हिरण्यके
शिवलमासदत्तीय । अन्येषां पर्वण्यव । प्रदोषकालोत स्मृत्याह बोधायनः अमावास्येनता
हविषु नक्षत्रे वेति । [illegible] कृत्तिकादि विशाखान्तेषु देवनक्षत्रेषु निके च यस्यामा व्यात
रयो चातुर्मास्यपि [illegible] यथाश्रुया गपक्षयोन्न [illegible] । यावज्जीवसा
ऋक्षत्रप्रयोगयोरस्ते फल [illegible] चेज्योवा [illegible] प्रदोषविशेषमाह कात्यायनः । अची
दक्षो [illegible] तिनियतपर्वसंधिः परस्तात्तत्त्वात [illegible] तिमयतु स्यात्स्य [illegible] । आ
रप्याप्रकृतिमध्यचिसर्व [illegible] नुवत्तान्हे [illegible] समानतंत्रेवा कार्यं इति त्रिकांडमंडनेन । सद्यस्व
अधिकारपशुस्त्वग्नीषोमीयेणसवनीयेन वा समानतंत्रे वा कार्यमिति त्रिकाण्डमण्डनेन । पौर्ण
सोमवारुपरस्तवः । अमावास्यायां दीक्षायजनीयेवामावास्यायां यजनीयेवासुत्पमरुः

मास्यां दीक्षायजनीये वा पौर्णमास्यां यजनीये वा सुममहरिति । बोधायनस्तत्रेऽपि पूर्वपक्षस्य
थमहनि दीक्षेन तत्र नक्षत्रयोगवती दर्शपक्षस्याह स्मृतेः । नक्षत्रयोगवेत्ययमर्थः । वेत्र्यादि पूर्णी
माय । त्रित्रा दिनसत्रयोगे दीक्षेतेति । आधाने तु पर्वणि नक्षत्रेषु चोक्तौ । तत्र पर्वनक्षत्रे गार्हपत्य
नादयातौ यादिकर्मकाल व्यापिग्राह्यौ । दिनद्वयतत्त्वे ग्राह्यौ । संकल्पस्यापर्वणि लाभात । पूर्वदिने
नक्षत्रपर्वोत्तरदेवग्राह्यौ । अत्र च गिरिसौत्रयतितान्पुनस्तत्र चपर्वत समूह विभक्तिषु च कृतुनक्षत्रेत
बलीयइति हिरण्यकेशिसूत्रात् किंतु वसंते ब्राह्मणोऽग्नीनादधीतेत्यादेः निर्णुकारिकायादु
मार्गादिपञ्चमासेषु श्रवणे चाश्विने तथा । [illegible] नीर्षवाक्कृत्तसे आधानमथाकार्येदिति कौ अ
प्रमृतक [illegible] । आधाननक्षत्राणि तापस्तंबसूत्रे कृत्तिका रोहिणी मृगशीर्षं पुनर्वसु पुष्य पूर्वोत्तना
पूर्वाषाढोत्तराषाढा हस्त चित्रा विशाखा नूराधा श्रवणोत्तराभाद्रपदा इति । सोमस्त्वाधाने विशेषमा
हापस्तंबः । स मन्यक्षमाणआदधानो [illegible] नक्षत्रमिति । अत्र प्रकरणाधानकालबाधः ।
मिते [illegible] नक्षत्रकालबाध्यत [illegible] नायमहत्रेचो [illegible] स्वामी तु साम सर्वादि यक्तेतुलस्या
दर्शपौर्ण [illegible] रत्वादुक्तकालबाधमन्यते । श्रीनामोडस्तु कालोतनरिधानैसर्वकालानादवि
नियद्दयमुक्तवान् । तत्राहि [illegible] दिकालोतरस्यया [illegible] वसंताचवाधेनाविधानैतथासानि

पुदगयनस्वर्वपस्य पुण्याहसंनिपाते यद्वाकाऽनादेशादिति छंदोगसूत्रोक्तेदगयनाबाधेन सोमाङ्गितिसं
धिनूपकालांतरविधानादुदगयने त्वपकृष्यत इत्युक्तं। द्वितीयपक्षेतु यदेवेनीयज्ञ उपनमेदिति सर्वकाला
स्नाउक्तेरिति भरद्वाजसूत्रान्। सर्वदेशस्य च विश्वजित्सर्वपृष्ठ इतिवद्द्वयोरत्र योगात्सर्वकालं वा वृष्टि।
तेन दक्षिणायनेऽपि नृवतीत्युक्तं। यत्तु तैष्यदेवव्रात तैष्यतंत्ररत्ने चपट्टस्ता। पित्रं तु पुनः कवतीत्यु
क्तेर्मितिदिक्   श्रीहलमावास्या त्रेधाविभक्तदिनतृतीयायोगेऽपराह्णे अगस्त्यद्यापनी साग्निकर्त्यां
द्या। पिंडान्वाहार्यकंश्राद्धं क्षीणे राजनि शस्यते। वासरस्य तृतीयंशे नातिसंध्यासमीप इति कात्यायनात्ते
दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितं। अपराह्णे पितृणां चेतत्र सानुप्रचारस्य न इति शातपोक्त्या। ता
दिनद्वये तत्र सत्त्वे सर्वापराह्णव्यापी दर्शो ग्राह्यः। यथा उक्तं पुरे विहितः सर्वापराह्णस्थित इति दीपिकोक्तेः।
युतकार्ष्णाजिनिः। भूतविद्धाममावास्यां मोहादज्ञानतोऽपि वा। श्राद्धकर्मणि ये कुर्युस्तेषां
युः प्रहीयत इति। स्पष्टा ह चतुर्दशी परमिति श्राद्धहेमाद्रिः। दिनद्वयेऽपराह्णव्याप्त्य सावेवग्राह्या
व्याप्नोति तिथिस्तस्य पूर्वेति हेमाद्रिः। यदा चतुर्दशीयामं तुरीयमनुपूरयेत्। अमावास्या क्षी
यमाणा तदैव श्राद्धमिष्यत इति कात्यायनोक्तेः। क्षीयमाणपक्षे दिनपूर्वाह्णव्याप्तेर्नियम
र्यं न दिनद्वयस्यापराह्णव्याप्त्यादौ तिथिद्वैधे हारीतः। त्रिमुहूर्ता च कर्तव्या पूर्वा खर्वा त्रिवर्द्धते। कुर्व

श्रीः
३७

नधर्मयुग्भिः कार्या यथेष्टस्तामग्नीनिति लिङ्गः। त्रिमुहूर्ता चेदुपर्वानेत्यर्थः। पींडपितृयज्ञस्तु काला
चनेर्यागादिनात्सर्वेद्युः कार्यश्चान्वेवाग्नत्वा पिंडपितृयज्ञ इति तन्नश्रेयः। व्याख्यातं चेतत्के
केदार्येः पूर्ववदर्शेऽपि पिंडपितृयज्ञापश्चात्। कुतः। अंगत्वात्। तथा च श्रुतिः। तस्मा
त्पूर्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान्यजत इति। पूर्वेद्युः पितृभ्यो यज्ञो निपणीयपज्ञा
तद्देवेभ्यः प्रतनुत इति चातनं तन्मतिं गमवासौ। तदुक्तं। अगंवासमभिव्याहारादितीतिच
तद्देवेभ्यः प्रतनुत इति। श्रीनंतभाष्ये तु परेद्युरित्युक्तं। अत्रह
नवके मतं चतुर्दशीयुक्ता दर्शे पिंडपितृयज्ञ इति। श्रीनंतभाष्ये तत्रैव पिंडपितृयज्ञः।
धाप्याचानीदृश्यते। आपस्तंबानां तु परदिने मुहूर्तमपि दर्शसत्त्वे तत्रैव पिंडपितृयज्ञः कुर्व
तदाऽऽपस्तंबः   अमावास्यायां यदहश्चंद्रं न पश्यंति तदहः पिंडपितृयज्ञः सर्वकर्म
तइति। अस्य तु उदर्त्तीया व्याख्या। पिंडैर्युक्तः पितृयज्ञः पिंडपितृयज्ञः सर्वकर्मनंगस्यादिति।
तर्थेन तु दर्शशेषः। यथा वक्ष्यति। पितृयज्ञः स्वकाले विधानादनंगस्यादिति। सधित
तीचयदहश्चंद्रमसं न पश्यंति पर्वदर्शं प्रतिपदि वा तदहः कुर्वीत। यदहरस्तमयः सधिम ...ना वाचापना
दरुचित्सर्थः इति। श्रीनानाडावाप्याहः। पिंडपितृयज्ञः स्तोऽपि पर्वसंधिम...

श्रीः
३७

क इति। अतः पर्वसंधिदिने पिंडपितृयज्ञः। शतपथश्रुतिरपि। यदैवैतं न पुरस्तान्न
पश्चाद्ददृशेऽथ पितृभ्यो ददातीति। पर्वसंधिदिने हि सर्वतः पश्चाद्वा चंद्रो न दृश्यतेऽत
स्तस्मिं समये पि पितृभ्यः क्रम्यद्दृश्यमानेऽपि पूर्वाह्णे तयज्ञं भवेद्यात्ममा
हित्त अमावास्याशब्दस्तिथिवचन एव पूर्वोक्तापस्तंबसूत्रेऽपि यद्दृष्टेन पश्येत्। तत्र
क्षयप्रोक्तोऽतः। अत एवैतद्दृश्यां चंद्रस्य क्षीणत्वात्तस्यां दर्शे पितृयज्ञः। यदुक्तं यद्ग
स्त्वेव दर्शनेन तिचंद्रमाः तत्रस्यापेक्षयाज्ञेयं क्षीणोऽपि नानि चेत्सपीतिर्यदुक्तं दृश्यमा
पितृयज्ञं दर्शेऽप्यपि स्यादिति च कात्यायनोक्तेः। दृश्यमानोऽप्यक इति गोभिलोक्तेः दृश्यमा
नोऽप्यक यस्यां सप्रागतः सोमो मृणालमिव दृश्यते। अपराह्णे क्षयस्तस्यां पिंडानां च
रणं ध्रुवमिति हारीतोक्तेश्च। चंद्रस्य कालश्चोक्तः कात्यायनेन। अष्टमेऽशे चतुर्दश्याः
क्षीणो भवति चंद्रमाः। अमावास्याष्टमेंऽशे च पुनः किल भवेदणुरिति। तेन एवं चतुर्दश्यपि
तृयज्ञस्य विधानं। कर्काचार्येणापि अपराह्णे पिंडपितृ

यज्ञः चंद्रादर्शने नामावास्यायामिति कात्यायनसूत्रे दर्शने न क्षय एवोक्तः। तस्मिन्नमावा
ददातीति श्रुतेः अतस्तन्मते चतुर्दश्यामपि युक्तोऽयं पितृयज्ञः सति पर्वदिने नियोगो यदि सिद्धः।
तदेतत्सर्वं पक्षमपि हेमाद्रिककादिव्याख्याने आपस्तंबवचनस्य पुरागोक्तातीय
बौधायनादिविषये। आश्वलायनानामपि शेषपर्वणि पिंडपितृयज्ञः। तथा च सूत्रे।
अमावास्यायामपराह्णे पिंडपितृयज्ञ इति। अत्र नारायणवृत्तिः अमावास्याशब्द
प्रतिपच्चतुर्दश्योः संधिवचनोऽप्यत्रापराह्णे शब्दसमन्वयात् तत्र होत्रादि वर्तते। तस्याप
हि कृत्वा चतुर्थे भागे पिंडपितृयज्ञः कार्यः। उपवासस्थेयजनीयेवाह्नि। यद्यपि हीनात्र
इवाति तिथिसंधिः स्यात्तदोपवसथ्य एवाह्नि क्रियत इति। अयं वत्सरात्मीयानां पौ
र्णमास्याद्व्यतिषंगेण कार्यः। व्यतिषंगो नाम तयोः सहानुष्ठानं। एतच्च अष्टादशपाद
नापिंडार्थमुद्धृत्येति सूत्रवृत्तिकृतोक्तेः। स्वंडपर्वणि केचिदाहुः। पूर्वाह्णे पिंडपितृयज्ञो व्यतिषं
गेण श्राद्धं चैतापनादिकवत्। पिंडपितृयज्ञः कार्यः। इति कृतान्वयं च पूर्वपक्षः। तिसृभ्यः
पार्वणी। काम्यमायुर्दयमस्यामेकोद्दिष्टमथापि मासि स्पृष्टा व्यय पूर्वपक्षे चतुःस्थालीपाकवत्

श्रीः ३९

दुहृव्याग्नौकरणमित्युक्ते दर्शश्राद्धस्थालीपाको नियत इति गम्यते स्थाली।कं पाकस्यापि
तृयइत्येवेति पूर्वदिने व्यतिषंगः सिद्धः।प्रयोगपारिजाते तु वार्षिकश्राद्धादेरपि व्यतिषंगउक्तः
किंतु दर्शश्राद्धस्यान्याय्यं विदस्त्वाकुः।सूत्रस्य वृत्तेस्त्र संपूर्णदर्शविषयत्वात्खंडपर्वणि पूर्व
दिने केवलं श्राद्धं परदिने च केवलः पितृयज्ञः कार्यः।अतएव केचित् इति केतानात्रापूर्वेःस्थ
तद्विषये वा पूर्वदिने च स्था
लीपाकः।अत्र द्यते सर्वश्राद्धेषु प्रसंगादिति।प्रयोगपारिजाते तिन्यप्ततद्विषये वा पूर्वदिने च स्था
लीपाक।अत्र द्यते सर्वश्राद्धेषु प्रसंगादिति।प्रयोगपारिजाते होमो विधीयते।पित्र्यब्राह्मणह
स्तेग्नौकरणमेवन पाणिहोमः।चतुर्थ्यादिषु साग्निनां वैकल्पिको होमः किं कार्योपि कस्य कथं गृह्याग्निहोमः।
स्तेयादुत्तरेषु चतुर्थ्यादितियशिविशिष्टनियमात् न चलौकिकाग्नौ पत्र्यस्मात्तद्गृह्यत्वेनस्मात्तेग्निष्वेव नाग्नि
नान्याग्नौपक्वमन्याग्नौजुहुयादिति निषेधात्।मेवं श्राद्धस्य गृह्यत्वे तस्मात्तेग्नावेव नाबुस
वाकर्तव्यत्वात्।तस्मात्सर्वेषुः केवलं श्राद्धं न व्यतिषंगः। इदमेव चयुक्तं आहिताग्निना श्राद्ध
वीधानिना होधानिना वा संपूर्णखंडेवा दर्शे श्रौताग्नौ एव पितृयज्ञः कार्यस्तदुत्तरं दर्शश्राद्धं
व्यतिषंगेणेति विस्तरनिर्णीतोविनमामः।संपूर्णदर्शे च विशेषमाह लौगाक्षिः।पक्षांते कर्म निर्वर्त्य
वैश्वदेवं च साग्निकः।पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधइति। पक्षांतकर्म्मान्वाधाने अ

श्रीः ३९

न्वाहार्यकं दर्शश्राद्धं।अयमेव साग्नेर्जीवत्पितृकस्य पिंडपितृयज्ञको वोद्दिष्टः।तस्यापि कात्या
यनेन होमांतं मनार्नं त्रैवेत्याम्नानात्।पिंडपितृयज्ञाकरणे प्रायश्चित्तमाह पुरश्चारमाधवी
येकात्यायनः।पितृयज्ञात्यये चैव वैश्वदेवात्यये पि च।भोजने पतितान्नस्य चरुर्वैश्वानरो भ
वेदियनल्ठ प्रहत्त मचुसनामः निराग्निकादिभिस्त्वमावास्या कुतपकालव्यापिनी ग्राह्या।
भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा।पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतपकालिकी।
तिज्ञानतोक्तेः।इदं च निरग्निकादिविषयं।सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि।
स्त्रीभिः २ शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैरिति लौगाक्षिवचनात्।अतः साग्नि
नोपासना निराग्निरिति मदनपारिजाते उक्तेः।सिनीवाली दृष्टचंद्रा तथा च व्यासः।दृष्ट
चंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृतेति।पूर्वदिने परदिने एव वा तद्व्याप्तौ सैव ग्रा
ह्या।अंशव्याप्तिवैषम्येऽधिककालव्यापिनी ग्राह्या।दिनद्वये परतः समव्याप्ता तिथि
धिसयपूर्वा द्वौ हासाम्य सपूर्वा।तिथिक्षये सिनीवाली तिथिद्वौ कुहूः स्मृता।साम्ये
पिरकुहूः यावदवदागवे दिशिरिति प्रचेता वचनात्।दिनद्वये संपूर्णकुतपव्याप्तिसति

पिंडं हि विच्छवतीत्यनंतरवचनात्स्वचनात्पैरेवेति कुतपस्तु अह्नो मुहूर्तो विज्ञेयो दशमाय
च सर्वदा ॥ तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः इति माधवीयोक्तेः ॥ वृकादानं पिदं देवश्री
स्थां मवासादावुपनीयाद्यत्यन्यत्र विस्तरः ॥ दर्शे च मासिके वार्षिकादि श्राद्ध प्रासोक्त
कारदेवि विशेषकतः ॥ दर्शस्य चोदकुंभस्य दर्शमाद्रिके यान्यपि ॥ नित्यस्य चा ॥ ह्रेकस्यापि
दार्शिकाब्दिकयोरपीत्युक्ताः ॥ संपाते देवतां भेदाच्छ्राद्धयुग्मं समाचरेदिति ॥ अकर्मा
निर्णयदीपिकोक्तेः ॥ नष्टचंद्रे यदा कालेस्याहार्दिवसोत्सवेत ॥ वैश्वदेवं क्षयश्राद्धं कुर्या
त्प्राग्दर्शलक्षणं ॥ अमाश्राद्धं चानुपनीतोपि कुर्यात् ॥ श्राद्धकल्पपाणौ ॥ अमास्यायां का
र्त्तिक्यामपरपक्षे दर्शेषु चेत्युपक्रम्य ॥ एतच्चानुपनीतोपि कुर्यात् सर्वेषु पर्वसु श्राद्धं साधा
रणं नाम सार्वकामफलप्रदं ॥ भार्याविरहितोप्येतत्प्रवासस्थोपि नित्यशः ॥ शूद्रोप्यम
न्त्रवत्कुर्यादनेन विधिना बुध इति मात्स्योक्तेः ॥ अमाश्राद्धातिक्रमे प्रायश्चित्तमुक्तं दि
शाने न्यसुवाचे ... अपनं चेतराने वाले दिने दिने ॥ अमाश्राद्धं यदा नास्ति तदा संपूर्णमेतितत्वा
अत्र पूर्वोक्त साग्निकपदं माहिताग्निः स्मार्ताग्निमांश्च गृह्यते ॥ विच्छिन्नाग्निकादिश्चानिर
ग्निकः ॥ तथा च हेमाद्रि ... करणे ॥

साग्निस्तथा वाग्निरस्तु द्विजपाणावथाप्सु वा ॥ कुर्यादग्नौ क्रियां नित्यं लौकिके नेति निश्चितमिति
स्मृतिवाक्यमुदाहृत्य यस्त्वस्वीकृतौपासनस्तया समुच्छिन्नाग्निस्तयाऽर्थी विधुरस्तथाऽग्नि
र्नास्ति तस्य द्विजपाणौ जलादौ वा होम इति व्याचचक्षे ॥ मदनपारिजातेप्येवं इदमेव साग्नि
कानग्निकस्वरूपं सर्वत्र ज्ञेयम् ॥ ॥ अथ ग्रहणं निर्णीयते ॥ ॥ तत्र चंद्रग्रहणे यस्मिन्यामे ग्र
हणं तस्मात्पूर्वप्रहरे ॥ तत्र यामं न भुंजीत ॥ सूर्यग्रहणे तु प्रहरचतुष्टये न भुंजीत ॥ सूर्यग्रहे तु नाश्नी
यात्पूर्वं यामचतुष्टयं ॥ नेति माधवीये गौतमात् ॥ ग्रह
त्वप्रहरमेव चतुष्टयं ॥ चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना ॥ प्रथमे प्रथमाद्ध इति मार्कंडेयोक्तेः ॥
णादूर्ध्वं चेद्ग्रहः प्रथमाद्विधियामतः ॥ भुंजीतावर्तनात्पूर्वं सूर्यग्रहे ॥ सूर्योदयात्प्राक् भोजनाप्रा
ग्रहअयिकेर्वे ॥ ननु चंद्रग्रहे यामचतुष्टयनिषेधश्चिंतितो न तु सूर्यग्रहे ॥ भोजननिषेधप्रसंगात् ॥ चंद्रग्रहेपि
तुः मेवं वचनस्य प्रथमयामे सूर्यग्रहे सति सर्वेद्युः पूर्वरात्रे भोजनमाचरेदिति द्वयोर्ग्रस्तास्ते
ग्रापनादू माधवीये वृद्धवसिष्ठः ॥ यस्तोदयविषये पूर्वेद्युः भोजनमाचरेदिति विप्लुषेपि अहोरात्रेन त्रो
तुमाधवीयव्यासः ॥ अनुक्तयोरस्तगयोर्द्वा ... हनीति

श्रीः ४०

श्रीः ४१

क्रव्यं चंद्रसूर्यग्रहे यदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परं। अहोरात्रनिषेधाः सूर्यग्रह
स्तास्ते मदत्तरले गार्ग्यः॥ संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदहर्नैव भुंजीत रात्राव
पिकदाचनः। सायंसंध्यायां सूर्यस्य ग्रहस्तास्ते पूर्वाह्णे रात्रौ च न भोक्तव्यौ। प्रातःसंध्यायां त्व
द्रस्य एवं ग्रस्तास्ते पूर्वरात्रौ उत्तरस्मिंश्चाह्नि न भोक्तव्यमित्यर्थः। चंद्रग्रस्तास्ते उत्तरदिने संध्या
होमादौ न दोषः। तदाहोरात्रानाः। ग्रस्ते चास्तंगते विंदोः ज्ञात्वा मुक्तिं च वधारणो। स्नानहोमा
दिकं श्राद्धकार्यं भुंजीत इंदुक्षये पुनः। एतदाहिताग्निविषयं। अहोरात्रे व्रतोपायनीयमत्री
तदिति कात्यायनोक्तेः व्रतस्य श्रौतत्वेन विहितत्वे चैन च प्रबलत्वात्। अद्भिर्व्रतं कुर्यादिति
निर्णयदीपः। नागप्राप्त भोजने काले नियमोऽयं तेन हूरादाविरजन भोजनं नैमित्तिककर्मानुसारिणः।
बालवृद्धातुराणां तु ग्रहयामात्पूर्वं नैकयामो निषिद्धः। सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनं।
अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे। भुंजीत संगवे चेत्स्यान्न पूर्वं भोजनं क्रियेति मार्कंडेयो
क्तेः। इदं च बालादिविषयं बालवृद्धातुरैर्विनेति पूर्वोक्तेः। वेधकाले ग्रहणवा पक्वमन्नेया

श्रीः ४१

ज्यं सर्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदिति हे
माद्रौ षड्विंशन्मतात्। शृतमिति तदंतरितस्योपलक्षणं नवश्राद्धेषु यच्छिष्टं ग्रहपर्युषितं च य
दिति मिताक्षरायां वचनात्। भार्गवार्चनदीपिकायां। ज्योतिर्निबंधे च मेधातिथिः। आ
रनालं पयस्तक्रं दधिस्नेहाज्यपाचितं। मणिकस्थोदकं चैव न दुष्येद्राहुसूतके। मन्वर्थमुक्ता
वल्ल्यां। अन्नं पक्वमिह त्याज्यं स्नानं सवसनं ग्रहे। वारितक्रारनालादि तिलदर्भैर्न दुष्य
ति। जले तद्दोषाभावो गंगाविषयः। ग्रहोषितजलं पीत्वा पादकृच्छ्रं समाचरेदिति चतुर्विंशतिमते
न्यजलस्य दोषोक्तेः। वेधकाले ग्रहणे वा भोजने प्रायश्चित्तमुक्तं माधवीये कात्यायनेन च
द्रसूर्यग्रहे तु भुक्त्वा कृच्छ्रं प्राजापत्येन शुध्यति। तस्मिन्नेव दिने त्वाविना त्रिरात्रेण विशुध्यति। ग्रह
णे च त्रिरात्रं चैकरात्रं वोपवासः स्त्रियार्थिना कार्यः। एकरात्रमुपोष्यैव स्नात्वा दत्वा च शक्ति
तः। कंचुकादिव सर्पस्य निर्मोकः पापकात्ततः। त्रिरात्रं समुपोष्यैवं ग्रहणे चंद्रसूर्ययोः। स्नात्वा
दत्वा च विधिवन्मोदते ब्रह्मणा सह इति हेमाद्रौ लिंगोक्तेः। इदं च पुत्रवद्व्यतिरिक्तविषयं। आदित्य
हनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः। पारणं चोपवासं च न कुर्यात्पुत्रवान् गृहीति जैमिनिवचनात्।

पराह्णे रवेर्ग्रस्तास्तं तदा पुत्रिणः अहर्द्वयं हित्वा बालादिवत् भोजनं न तूपवासः। सायाह्ने ग्र
हणं चेत्स्यादिति पूर्वोक्त मार्कंडेयवचनात्सायाह्ने संगवे ग्रहे रात्रौ च्छादे संगवादधः। मध्याह्ने
परतो ग्रीयान्नोपवसेन्न विग्रहे इति स्मृतेश्चेति हेमाद्रिः। शारदापत्याकं: माधवमते तु पु
त्रिणोपि तत्रोपवास एव। अहोरात्रं न भोक्तव्यमिति पूर्वोक्त निषेधस्य तेनापि पालनीयत्वात्।
उपवासनिषेधस्तु व्रतरूपोपवासपरः। कृष्णैकादश्यां निषेधवदिति। मदनरत्नेप्येवं। तथाच व्या
सः। रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा। चूडामणिरिति ख्यातस्तत्र दत्तमनंतकं। वारेष्वन्ये
षु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः। तत्पुण्यं कोटिगुणितं योगे चूडामणौ स्मृतं। अत्र चाद्यंतयोः स्ना
नं कुर्यात् ग्रहे माने नवे संस्नानं ग्रहस्त होमो विधीयते। मुच्यमाने च वेद्धनैमुक्तस्नानं विधी
यते इति हेमाद्रौ वचनात्। स्नानं स्याद्दुपरागादौ मध्ये होमः सुरार्चनमिति ब्रह्मवैवर्ताच्च। सर्वेषामे
व वर्णानां सूतकं राहुदर्शने। सचेलं च भवेत्स्नानं सूतकान्नं च वर्जयेदिति वृद्धवसिष्ठोक्तेश्च। सचेलं
च मुक्तिस्नानेप्येवमिति मदनरत्ने उक्तं। भार्गवार्चनदीपिकायां चतुर्विंशतिमते। मुक्तौ यस्तु न कु
र्यात्स्नानं ग्रहणसूतके। सूतकी न च वेत्तावद्यावत्स्यादपरो ग्रहः। इदं च स्नानमंत्रकं कार्यमिति स्मृति

रत्नावल्यां तत्र विशेषो नत्र तीर्थविशेषो भारते गंगास्नानं न कुर्वीत ग्रहणे चंद्र
सूर्ययोः। महानदीषु चान्यासु स्नानं कुर्याद्यथाविधि व्यासः इंदोर्लक्षगुणं पु
ण्यं रवेर्दशगुणं ततः। गंगातोये तु संप्राप्ते इंदोः कोटी रवेर्दश। गवां कोटिसहस्रस्य यत्सम्य
ग्दत्तेन नरः। तत्फलं लभते मर्त्यो ग्रहणे चंद्रसूर्ययोः। असंभवे तु माधवीये शंखः। वापीकूपतडागेषु गि
रिप्रस्रवणेषु च। नद्यां नदे देवखाते सरःसु [illegible] उद्धृतोदकेन [illegible] चंद्रसूर्ययोः।
तत्र तारतम्यं मार्कंडेयः। शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात्। भूमिष्ठमुद्धृतात्पुण्यं ततः प्र
स्रवणोदकं। ततोपि सारसं पुण्यं ततः पुण्यं नदीजलं। तीर्थतोयं ततः पुण्यं महानद्यंबु पावनं। ततस्ततोपि
गंगांबु पुण्यं पुण्यस्ततोंबुधिरिति। उष्णोदकं मार्गाविषय। तथा गोदावरीं महापुण्यां चंद्रराहुस
मन्विते। सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने। नर्मदातोयसंस्पर्शी कृतकृत्यो भवति हि। पृथ्वी
चंद्रोदये प्रभासे च। गावो नागो तिलाः धान्यं नलानि कनकं मही। स्वप्रदाय कुरुक्षेत्रे यत्फलं
लभ्यते नरैः। तदिंदुग्रहणे काश्यां स्नानात्कुर्वीत पंडुनी। तत्रैव सौरपुराणे ब्धिस्नानमुपक्रम्य
दानानि यानि लोके सुविख्यातानि मनीषिभिः। तेषां फलमवाप्नोति ग्रहणे चंद्रसूर्ययोः। देवीपु

राणे। गंगायां कनखले पुण्यं प्रयागं पुष्करं तथा। कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे। स्ना
नासंध्ययेस्मरणं वा कार्यमित्यस्मृत्यादौ तत्कृतफलं दृष्ट्वा दृष्ट्वा सर्वघनाशनं। स्पृष्ट्वा गोमेधपुण्यं
तु पीत्वा सौत्रामणेः फलं छेदात्स्नात्वा वाजीमखं पुण्यं प्राप्नुयाद विचारतः। रविचंद्रोपरागे च
अयने चोत्तरे तथेति मार्कंडेयोक्तेः। अत्र श्राद्धमाह कृष्यशृंगः। चंद्रसूर्यग्रहे यस्तु श्राद्धं
विधिवदाचरेत्। तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे। भारते सर्वस्वेनापि कर्तव्यं श्रा
द्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदति। विष्णुः राहुदर्शनदत्तं श्रीः ४२
हि श्राद्धमाचंद्रतारकं। इदं चामान्नेन हेम्ना कार्यं न पक्वान्नेन। आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्र
श्रीः ४२ हे तथा। आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति शातातपोक्तेरिति हेमाद्रिमाधवादयः। अ
पराकेस्तु एतद्द्विजानां कामात्वेद्व्यतीर्थश्राद्धे वा पाकाभावे द्विजातीनामामश्राद्धं वि
धीयत इति स्मृत्युक्तेः। सैंहिकेयो यदा सूर्यं ग्रसते पर्वसंधिषु। गजच्छाया तु सा प्रोक्ता तस्यां
श्राद्धं प्रकल्पयेत्। घृतेन भोजयेद्विप्रान्यस्तु सोमग्रहे द्विजानिति वायवीयोक्तेश्च या

विज्ञानेश्वरोप्याह। ग्रहणश्राद्धे भोक्तुर्दोषो दातुस्तु न स्यादिति। सूतके मृतके चैव ग्रहे शशिभास्करे।
छायायां हस्तिनश्चैव न भूयः न भूयः पुरुषो भवेत्। इत्यापस्तंबेन भोजनेन निषेधाच्च। अयं च निषे
धः श्राद्धभोक्तुः। हस्तिच्छाया साहचर्यात्। अत्र ग्रहणनिमित्तकश्राद्धेनैवामासंक्रांत्यादिनिमित्त
कानां सिद्धिः। रविकालव्ययेनापीति कालादर्शोक्तेः। अथाशौचमध्येपि स्नानश्राद्धादिका
र्यमेव। सूतके मृतके चैव न दोषो राहुदर्शने। तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते। इति माध
वीये वृद्धवसिष्ठोक्तेः। स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके इति व्याघ्रपादोक्तेश्च। कालादर्शे
गिराः। सर्ववर्णाः सूतके पि मृतके राहुदर्शने। स्नात्वा श्राद्धं प्रकुर्वीरन् दानं शाठ्यविवर्जितं। मद
नपारिजाते पि। तेन स्नानमात्रं प्रकुर्वीत दानश्राद्धविवर्जितमिति निर्मूलं वदंतो गौडाः परास्ताः
इदं च शुद्धिनविशेषान्मदीक्षापुनः स्वपणादि सर्वस्मार्तकर्मविषयं। मदनरत्नेप्येवं। रज
स्वलायास्तु काश्यपगर्गवाचनदीपिकायां सूर्योदयनिर्बंधे। नरहजनकादिदोषोत्पत्तौ यदा ग्रहणं जा
दिषु ग्रहे नमायातदुदकापिततीर्थादुत्तवारिणोति। अत्र० स्नानं निमित्तके प्राप्ते नारी यदि रजस
ला पात्रेण नितोयेन स्नानं कृत्वा वृत्तं चरेदित्यादि स्मृतार्थसारोक्ता विधिर्ज्ञेयः। तथा० ग्रहणाद्यावा

रपि श्राद्धादिकार्यं ग्रहणे द्वादशसंक्रांतियामत्रि प्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते इत्य
पराके व्यासोक्तेः। चंद्रग्रहे तु यामत्रि रात्रौ स्नानं दानं प्रशस्यत इति देवकोक्तेश्च। यदा तु ज्योतिःशास्त्रगम्यो
दिने चंद्रग्रहो रात्रौ च सूर्यग्रहस्तदा स्नानादि न कार्यं। सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा। तत्र
स्नानं न कुर्वीत दद्याद्दानं च न क्वचिदिति वृद्धवसिष्ठस्मरणात्। ग्रहणदिने वार्षिकश्राद्धप्राप्तौ तु प्रयोगपा
रिजाते गोभिलः : दर्शे च रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थिते। अन्नेनासंभवे हेम्ना कुर्याद्वा
मेन वा सुत इति। अत्र दर्शे रविग्रहे पितृसुत शब्दाः प्रदर्शनार्थाः। न्यायसाम्यात् तेन चंद्रग्रहणेपि
श्रीः ४४ सपिंडाः आब्दिकं वार्षिकं मन्वादिनात्तद्दिन एव कार्यमिति मदनपारिजाते व्याख्यातं पृथ्वीचंद्रो श्रीः ४४
दयेप्येवं तेन यानि आमश्राद्धं प्रकुर्वीत मासस्संवत्सरादृत इति। अन्नेनैवाब्दिकं कुर्याद्धे
म्ना वा मनुनक्वचिदिति मरीचिस्लोकाद्याः इत्यादिवचनानि तानि ग्रहणादिनातिरिक्तविषयाणि भवि
ष्यामृतेप्येवं यानि तु ग्रहणात् द्वितीयदिने तज्ज्ञापकमात्रपरं तथा ग्रहस्तोदयेप्युदा चंद्रग्र
स्य दृष्टे समुपस्थिते। तद्दिने चोपवासः स्यात्स्वस्थे तु परेह्नि तथा ग्रहस्तावेवास्तमाने तु पर्वणि दृष्टे
मुत्तीयादाप्रस्वस्थं तु यदा कार्यं प्रपेदेह्न्येव सर्वदा। चंद्रसूर्योपरागे च तथा श्राद्धं प्रपेदनीयादि।

निवचनानि तानि निबंधेषु क्वाप्यनुपलब्धानि मूलानि प्रत्युत पूर्वोक्तनिबंधेषु तद्दिन एव श्रा
द्धमुक्तमित्यलं। ग्रहणादिरससहदिनत्रयं तं रामगोपालकाद्यागमदीक्षासोक्ता। शिवार्चने चंडिका
यां ज्ञानार्णवे। मंत्राद्यापनं न कुर्याद्ग्रहणे चंद्रसूर्ययोः। ग्रहणाद्वापि देवेशि कालः सप्तदिना
वधीति। रत्नसागरे सत्तीर्थे कैविधुग्रासे तं तु रामनपर्वणि। मन्वद्दौ प्रभुग्याणोमासस्सरादि
नद्यापयेत्। अत्र सूर्यग्रहणमेव मुख्यं। सूर्यग्रहणवत्क्वचित् नान्यदन्वीक्षिते ऽवतः सूर्यग्रहण
कुर्यादीनां यादीसावृतचारिणी। विनरस्वस्य च यासी सा दारिद्र्य सत जन्म स्थिति नैव योगिनि
दस्या ग्रहणं नवीक्षेत्। हिंसस्तनदष्टुमध्यमस्थितौ त्रोष ब्रानिषं कोथिनी नेति। आयुष्का
मेऽपि निबध्यात्। ग्रहणं तु जन्मनार्याद्दौ निषिद्धं। तदुक्तं ज्योतिषे विपद्गोचरायापरतिलराशौ तत्र
दृष्ट्वा मेदाश्च नव इषुपंच मदनरवेगर्गः जन्मसप्ताष्टनीफोकदर्शनस्थे निशाकरो। द्विष्ठेरि
प्रदानाद्दुर्जन्मर्क्षे निधनेपि च। रिप्फद्वादशे अंकानव निधनेस्तसमताना। पृथ्वीचंद्रोदये

विसृष्टधर्मे। यन्नक्षत्रगते राहौ ग्रसते शशिभास्करौ। तज्जातानां भवेत्पीडा ये नराः शांति
वर्जिताः। तत्रैव पुराणांतरे। सूर्यस्य संक्रमो वापि ग्रहणं चंद्रसूर्ययोः। यस्य त्रिजन्मन
क्षत्रे तस्य रोगोथवा मृतिः। तस्य नै --- चहोमं चंद्रेवार्चनं उपोषणं। उपरागादिकं चैवं चक्षु
र्यः कांतिर्विवीक्ष्यति। स्वर्णेन वाप्यपिष्टेन कुर्यात्सर्पस्य वाकृतिं। ब्राह्मणाय ददेत्तस्य न रोगो
दिष्टं तत्कृतः। जन्मनक्षत्रे तत्पूर्वोत्तरे त्रिजन्मनक्षत्रमिति कथ्यते जन्मदशमैकोनविंशता
नाशति केचित्। सर्पस्य तदाकारस्य नागो शिरस्यर्थः। अद्भुतसागरे भार्गवः यस्य राज्यस्य नक्षत्र
स्वर्भानुरुपरज्यते। राज्यभंगं सुहृन्नाशं मरणं वात्र निर्दिशेत्। राज्यस्य नक्षत्रं अभिषेकनक्षत्रमि
ति तत्रैव व्याख्याते। गर्गो वाचेन दीपिकायां ज्योतिःसारे। सौवर्णं कारयेन्नागं पंकेनाप्यपलार्धतः
तदर्धेन तदर्धेन पणायामौक्तिकं न्यसेत्। ताम्रपात्रे निधायाथ घृतपूर्णे विशेषतः। कांस्ये वा कांति तिलो
हेवान्यस्य दद्यात्सदक्षिणं। चंद्रग्रहे द्रुतरूपस्या बिंबं दद्यात्सदक्षिणं। नागं रुक्ममयं सूर्यग्रहे बिंबं
वं च हेमजं। उरगं नवघृतो भूमितिक सर्पिष्काचने॥ काकविवेकेपि॥ सुवर्णनिर्मितं नागं
सतिके कांस्यभाजने। सदक्षिणं सवस्त्रं च ब्राह्मणाय ददौ निवेदयेत्॥ सौवर्णं राजतं वापि बिंबं ह

ग्रं॰ ४५

ग्रं॰ ४

त्रत्र शांतिं तत उपरागं च वक्ष्ये शांति हे विप्राय कल्पयेत्। मंत्रस्तु। तमोमय महाभीम सोमसूर्य
विमर्दन। हेमताराप्रदानेन मम शांतिप्रदो भव। विधुंतुद नमस्तुभ्यं सिंहिकानंदनाच्युत। दानेनाने
न नागस्य रक्ष मां वेधजाद्भयात् इति। अत्र शांतिरप्युक्ता मात्स्ये। यस्य राशिं समासाद्य भवेद्राहु
ग्रसंभवः। स्नानं तस्य प्रवक्ष्यामि मंत्रौषधिसमन्वितं। चंद्रोपरागं संप्राप्य कृत्वा ब्राह्मणवाचनं।
संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः। पूर्वमेवोपरागस्य समानीयौषधादिकं। स्थापयेच्च
तुरः कुंभानव्रणान्सागरानिव। गजाश्वरथ्यावल्मीकसंगमाह्रदगोकुलात्। राजद्वारप्रदेशाच्च
मृदमानीय निक्षिपेत्। पंचगव्यं पंचरत्नं पंचत्वक्पंचपल्लवं। रोचनं पद्मकं शंखं कुंकुमं तथा
चंदनं। शुक्तिं स्फटिकतीर्थांबु सितसर्षप गुग्गुलं। सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आया
तु यजमानस्य दुरितक्षयकारकाः। योसौ वज्रधरो देव आदित्यानां प्रभुर्मतः। सहस्रनयनश्चंद्रग्रहपीडां
व्यपोहतु। मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः। चंद्रोपरागसंभूतामग्निः पीडां व्यपोहतु। यः क
र्मसाक्षी लोकानां धर्मो महिषवाहनः। यमश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु। रक्षोगणाधिपः
साक्षान्नीलांजनचयप्रभः। खड्गहस्तोतिभीमश्च ग्रहपीडां व्यपोहतु। नागपाशधरो देवः सदा म

करवाहनः सजकाद्विपतिर्दिबोधक ब्राणरूपोहितलोकानां सदाकलमृगप्रियः। वायुश्चंद्रोपरागोत्थंपा
प ध्योऽसौ निग्रहपतिर्देवः खड्गध्वजलगदाधनाः। चंद्रोपरागकलुषंधनदोत्रव्यपोहतु। योसौ विंदुधरोदेवः
पिनाकीवृषवाहनः। चंद्रोपरागपापानि सनाशयतुशंकरः। त्रैलोक्ये यानि भूतानि स्थावराणि
चराणि च। ब्रह्मविष्ण्वर्कयुक्तानि दहंतु मम पातकं। एवमावाह्य सर्वत्र पट्टे वा पंचमंत्रेण स्वस्ति वाचनैः।
रत्नानि वस्त्राभिमंत्र्य स्वर्णपट्टे विलेखयेत्। तावचपट्टे च वालेख्य चंदनेन तथैव च। मस्तके यजमा
नस्य न्यस्य निदध्युस्ते द्विजोत्तमाः। कलशान्नव्यसंपूर्णान् नानारूपसमन्वितान्। गृहीत्वा स्था
पयेद्रुद्रं पीठोपरि स्थितो। पूर्वोक्तैव तु मंत्रैश्च यजमानं द्विजोत्तमाः। अभिषेकं ततः कुर्युः सर्वौषधिवा
रिसूक्तकैः। आचार्यं वरयेत्तस्मै स्वर्णपट्टं निवेदयेत्। आचार्यदक्षिणां दद्यात् दानैस्तु च वा
नितः। होमं चापि प्रकुर्वीरन् तिलैर्व्याहृतिभिस्तथा। दानं च शक्तितो दद्याद्धर्मे द्विजातयेऽहितो।
सूर्यग्रहे सूर्यनामा युक्तान् मंत्रांश्च कीर्तयेत्। अनेन विधिना युक्तः ग्रहणस्नानमाचरेत्। न तस्य
ग्रहणे दोषः कदाचिदपि जायते इति ग्रहणशांतिः भार्गवार्च्चनदीपिकायां ब्रह्मसिद्धांते।
सर्वैः परस्थितैवीक्ष्य क्ष्यर्व्यर्वकौ तैलंबुपर्वणोः। ग्रहणं गुर्विणीजातु नपश्येत् तुपरंविना

४८

तथा संगताः सुतेषु वेधविशेषो हेमाद्रौ। त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवं। मांगल्येषु सम
स्तेषु ग्रहणे चंद्रसूर्ययोः। प्रकारांतरमप्युक्तं तत्रैवोक्तं द्वादश्यादि द्वितीयांतो वेधः इंदुग्रहे स्मृतः। एकादश्यादि
के सौरे चतुर्थ्यंतः प्रकीर्तितः। इदं च पूर्वग्रस्तग्रस्तास्तग्रहे खंडग्रहे रत्नयोरिति तैरेवोक्तेः
[illegible] निर्विघ्न वचनः ग्रहणात्प्राक् साउर्ध्वं मंगलेषु त्रयं। यस्य वर्णविना [illegible]
दग्धकाष्ठवत्। अन्यानि चापि त्र्यादिमंडकानि तत्कालैर्वर्णविकायादि फलं च दैवप्योज्ञेयं।
पुरश्चरणं चंडिकायाः। चंद्रसूर्योपरागे च स्नात्वा प्रयतमानसः। स्पर्शादिमोक्षपर्यंतं ज
पेन्मंत्रं समाहितः। जपाद्दशांशतो होमस्तथा होमाच्च तर्पणं तर्पणस्य दशांशेन मार्जनं क
पितं किल। सर्वेष्वदेवतासु पंच्याचा अनंत प्रमुख्यं ते नमा तं मंत्रमुच्चार्य तदंते देवता द्वितीयांतिया
नाम दद्यात् दशांशाभिषिंचामि अनेन तत्तोयैर्मंत्रं जुहुयात् द्विजः। मार्जनं दशदशां
शेन ब्राह्मणानपि भोजयेत्। जपो चाप्युक्तो होमस्तर्पणं चाभिषेचनं हृदेवपूजनं पंचप्रकारा
का पुनः क्रिया तथा होमाशक्तो जपं कुर्याद्धोमसंख्याचतुर्गुणं। एवं कृते तु मंत्रस्य
जायते सिद्धिरुत्तमा। ग्रहणप्रसंगात्तु तु सर्वप्रतिग्रहप्रायश्चित्तमुच्यते तिलैस्तु णस्मृतौ।

त्तियाः॥ विकुत्रुक्षेनेन नृयः पूतुषो ऽस्वेन्॥ तथापि मनसः स्नुहे प्रायश्चित्तं समाचरेत्॥ सप्त
रुद्धं हयेंकुर्यादेवनेन समन्विते। सत्रेण वायुजेताय जपेद्वालक्षसप्तकं। वापीकूपतडागा
दिखनने विभ्रजेदन्निमिति। एतच्च यत्र विहितेनार्जयेतिकर्मणा ब्राह्मणावनी। त
स्यासत्राण सुच्याति दानेन तपसैव च चातिमनुते वत्स गोत्रं रक्ष्येयमिति दिक्॥ यद्रुणाति रित
स्य पर्वसंकालिते तद्व्यस्य द्वैगुण्यं भवतीति सिष्टाः॥ अत्र केचिद्वोद्ववल्या आहुः ग्रहण
स्य निमित्तत्वे नृतानि श्चयस्य प्रयोजकत्वात् ज्योतिःशास्त्रादिनाज्ञात स्य ज्ञान
स्य निमित्तत्वे प्राप्तेपि स्नानदानेततः श्राद्ध मेनतेनाकुदर्शने चेंद्रसूर्योपरागे यावद्दर्शन
गोचर इति जाबाल्यादिवचनेषु दृशिप्रयोगा चाक्षुषज्ञानस्यैवापसंहार न्यायेन निमित्तत्व
अन्यथा दृशेर्योल्लक्षणास्यात्॥ तेन मेघाच्छादने याद नो चस्नानश्राद्धादौ नाधिकार इति॥ कल्प
तरुरप्याह॥ दर्शनशब्देन चाक्षुषज्ञानं मतं तेन ज्ञानमात्रं। अज्ञानस्य निमित्तत्व सं
वान्निमित्तमहिम्नैव ज्ञानलाभेन दर्शनपदवैयर्थ्यापत्तेः तेन चाक्षुषे ध्ये योग्यः केवलं प्रणप।
योग्यत्वं च प्रयत्नानपतेय चाक्षुषज्ञान प्रतिबंधकाभावादित्यर्थः तेन मेघच्छन्नेन योग्यता॥

श्री:
४१

श्री:
४१

रुक्सस्नानादीति निर्णयामृतेप्येवं तदेवमुक्तं यदि चाक्षुषज्ञानं निमित्तं स्यात्तदा सूर्यग्रहो यदा नौ वै
दिवा चंद्रग्रहस्तस्यात्तत्रस्नानं न कुर्वीत दद्याद्दानं च कर्हिचित्॥ इति किं वाक्यं व्यर्थं स्यात्॥ चाक्षुषज्ञानाभा
वेन प्राप्त्यभावात् तस्मात्पूर्वं कलाचनिषेधस्य। न चेदं ग्रस्तास्तपरं। रविचंद्रयोरस्तानंतरं रात्रिदिवाग्रह
त्वाभिधिवाच्यात्तत्र पदस्य ग्रहपरत्वे धिकरणात्वायोगात् निमित्तपरत्वे चात्र ग्रहपरनिमित्तक
स्नानादेरस्तात्प्रागप्यप्रवापत्तेः अयतत्र न रात्रौ दिने उच्यते सा कृष्णे देवीति वरुण भूतम
मंत्र
नितन्न। तादृशलिंगाभावात्॥ निमित्तत्वेधिकारांगत्वेवान्न युक्तस्नानाद्यभावापत्ते
श्च किंच नेक्षेत्तोद्यंतमादित्यं नास्तं यातं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतमिति
मनुवचने वाच्यं तानचात्र विहिते दर्शने निषेधाप्रवृत्तिवत्पर्युदसनीयतापत्तेश्च युक्तोक्ति
वाच्यो दर्शनस्य वचनादेनत घयत्यात्राबाद। एतच्चाग्रेव क्ष्यामः। तस्मात्तविवेकाश्र्वित्रकृत्या
पत्तेः। रवेर्हेनोस्थितः इत्यादिच। अस्तु स्पर्शदर्शनविधानेन सकाचित्दा न स्मृति दृष्ट्वा।
नैमित्तिकादितिमुक्तिसत्तानिपिचाक्षुषज्ञानस्य निमित्तत्वापत्तेः। उच्यते किं न रिक्तेभ्यो भातिवत्।
यत्रातिलयाः परेच्छु तु दयात् दृष्ट्वाप्यवस्थितेक्षुचिरात्तनायवायि द्रुगुणादर्शनोत्तरं गाज नाशेवानादर्शं

स्पर्शवेधकाले स्नानाद्दर्शने भोजननिषेधापत्तेः। मध्ये ग्रहणस्य सूतकादौ बहुशः स्नानोपवासप्रसंग
श्च। अथा नूनं लोलुपत्वं तत्र ज्ञानमात्रं विवक्षितं तत्पुनरेवमपि निर्लज्जैर्न स्वीक्रियते। न मुक्तिस्ना
नेनाक्षीयते न च ज्ञानं निमित्तं न चाक्षुषं। चंद्रसूर्यग्रहे नाद्यात् तस्मिन्नहनि स्पृष्टः। याहां विमुक्तौ वि
ज्ञाय स्नात्वा कुर्वीत भोजनमिति हि गौतमेन विज्ञायेति ज्ञानमात्रोक्तेः। यत्तु मुक्तिं दृष्ट्वा भो
क्तव्यं स्नानं कृत्वा ततः परमिति तदपि ज्ञानमात्रपरं। मेघमालादिदोषेण यदि मुक्तिं न दृश्यते आ
श्रीः कलय्य तत्काले स्नात्वा भुंजीत वाग्यत इति गौडनिबंधे वचनात् नैवं अज्ञातस्य निमित्तत्वा श्रीः
४८ वेनिमित्तं न महिम्नैव ज्ञानलाभे वाक्यवैयर्थ्यात् एतेन यत्केनचिदुक्तं। स्पर्शस्नाने मुक्तिस्नाने ४८
च पस्यदर्शनेतेनैव कार्यं नान्येन। क्त्वाप्रत्यये समानकर्तृकत्वावगतेरिति तन्निरस्तं कातरितस्यग
तिः दर्शने उद्देश्यविशेषणत्वाद्ग्रहैकत्ववद्विवक्षितार्थतः सिद्धज्ञानमात्रानुवादत्वेन सर्वसुस्थं। अंगुक्ताद्ध
नादेश्य ग्रहव्याहृत्यावादेन स्यार्थवत्त्वं न चोक्तिकर्मयोग्यता। एसाध्वी। दर्शनोत्तरं न घटते योग्यता
ज्ञप्त्यादिनाघटनावापत्तेः। तेन तद्विशेषणं वच्छेदनस्य ज्योतिःशास्त्रावच्छिन्नस्यैव योग्यता। किंच राज
सादर्शनेना रात्रि यात्रमन्नश्चि(?)द्दिव्यशाप्य घटिकानामार्गोचाभावप्रसंगः। किंच ग्रस्तास्त

गेः पूरेषु … निषिद्धयाद्दिव। द्वैवैयर्थ्यापत्तेः। चाक्षुषज्ञानान्यथानुपपत्त्यैवार्थो
कद्वयत्वेन सिद्धेः। किंच। दर्शनं विशेषणमुपलक्षणं वा। नाद्यः दर्शनाविशिष्टकाले स्नानतुक
…नोदर्वा ग्रहः। दर्शना… ग्रहणनिमित्तं स्यात्। नाद्यः। यावद्दर्शनगोचरत्वेति
याक्यवैयर्थ्यप्रसंगात्। दृष्टग्रहस्य ग्रहणात्तस्यापि स्नानाद्यापत्तेश्च। ज्ञानपक्षेप्येष दोषस्तु त्या
इतिचेत्। मूर्खोसि यदि ज्ञानवाचकं पदं श्रूयेत। न तत्तस्यान्वयो विचार्येत। दृग्भिन्नश्रूयत इति वे
कार्यं कुर्वीत हि ज्ञानं लक्ष्यते संक्रांतौ स्नायादितिवद्दर्शनाद्धि स्वेहि। अश्रुतत्वादेव नो दृश्यानुविधे
ष विशेषणविवक्षाकृतो वाक्यभेदोपि। अस्तु तर्हि दृष्टग्रहणनिमित्तमिति चेत्। गुरुत्वात्तदेवं स्नो
तत्स्नानापत्तेः। विशिष्टोद्देशवाक्यभेदाच्च। तत्रापि तत्तुल्यमिति चेत्। यावद्दर्शनगोचरस्तावदेव
नतन्निषेधात्। तत्र तन्मग्रह इव ग्रस्तास्तेपि स्यात्। किंच। दर्शनस्य विधिरनुवादो वा। आद्योप्य
रूपांशेन दर्शनं विधिरुत दर्शनविशिष्टस्नानविधिरुत स्नानोद्देशेन दर्शनविधिः। नाद्यः।
स्पर्शोद्देशेन स्नानविधानदर्शने च वाक्यभेदात्। एतेन द्वितीयोपि परास्तः। न तृतीयः स्ना
नयाप्तेः। दर्शनस्य निमित्तत्वेनाविधेयत्वाच्च। अन्यथा सामवमनादौ प्रसंगात्। विधिः केन

वोर्यते। अथनानाकर्येषु कचिद्दर्शनविशिष्टस्नानविधिः। कचिच्छ्रान्तीदर्शनेनिमित्तीकृ
त्यस्नानमात्रविधिः। तत्रस्नानप्रधानस्यप्राप्तौतदंगदर्शनप्राप्तिः। तस्यांचनिमित्तेसतिस्ना
नमित्यन्योन्याश्रयात्। एवंदर्शनविधौसतितन्निमित्तकस्नानविधिः। सतिप्रधानस्नानविधौत
दंगदर्शनविधिः। एवमधिकारेप्रयोजकत्वेचयोज्यौ। स्नानार्थपूर्वकालविधौचास्त्येवमत्भेदः। अ
न्यथास्नानोत्तरमपिस्यात्। नद्वितीयः। तत्रापिदर्शनग्रहयोर्निमित्तत्वेस्नानद्वयापत्तेर्दर्शनाद्वन्नी
नैमित्तिकावृत्तिप्रसंगाद्दर्शनविशिष्टग्रहस्यचविशिष्टस्यानुवाक्यत्वेदापत्तेः। ननुहविरार्त्तिवद्दृष्टि
श्रीः एवंनिमित्तमितिवचः। आर्त्तिमात्रस्यैहिनिमित्तत्वेनिमेषादावतिनपितत्वापत्तेर्नैमित्तिकत्वेनगा श्री
पृक्तौविशिष्टेद्रियत्वे। इन्दुग्रहणमात्रस्यनिमित्तत्वेनकाचित्क्षतिः। तस्माद्दर्शनवाक्यनी। ग्र ४९
त्वात्तद्विपर्यत्वादनादेश्ययग्रहणपार्श्वीवीदाज्ञानस्यवाधतः प्राप्तिस्तदेवनिमित्तं। तेनमेघाच्छादने
थादश्चस्नानोदिन्नवत्सेवेतत्क्वेदवाह्यैः सत्लापेन ॥ इतिग्रहणनिर्णयः ॥ अथसमुद्रस्नाने ॥
आश्वलायनः। समुद्रेपर्वसुस्नायादमायांचविशेषतः। पापैर्विमुच्यतेसर्वैरमायांस्नानमात्वर
न। भृगुभौमदिनेस्नानंनित्यमेवविवर्जयेत् ॥ गायत्रे अश्वत्थसागरौसेव्यौनस्प्रष्टव्यौकदाचन ॥

अश्वत्थं मंदवारेतुसागरंपर्वणिस्पृशेत्। पृथ्वीचंद्रोदयेस्कांदे पुनातिपर्वणिस्नानात्पर्वणेः सरितांपतिः।
कदाचिदपिनैवात्रस्नानंकुर्यादपर्वणि। अस्यापवादस्तत्रैवप्रभासखंडे। पर्वकालेचसंप्राप्तेनदी
नांचसमागमे। सेतुबंधेतथासिंधौतीर्थेष्वन्येषुसंयुतः। एवमादिषुसर्वेषुमध्येन्येषुस्वकर्मणि।
तथा विनामंत्रैर्विनापर्वसुनाकर्मविनानरैः। कुशाग्रेणापिसप्तदिवानस्प्रष्टव्योमहोदधिः तथा
नकालनियमस्सेतौसमुद्रस्नानकर्मणि। तद्विधिस्तत्रैव। पिप्पलादसमुत्पन्नेकृत्येलोकभयंकरे। पाषाणी
तेमयादत्तमाहारार्थंप्रकल्प्यतां। मितिपाषाणंप्रक्षिप्य। विश्वाचीचघृताचीचविश्वयोनेविशांपते। साग्नि
ध्यंकुरुमेदेवसागरेलवणांभसि। नमस्तेविश्वगुप्तायनमोविष्णोअपांपते। नमोजलाधिरूपायनदी
नांपतयेनमः। समस्तजगदाधारशंखचक्रगदाधर। देवदेहिममानुज्ञांत्वत्तीर्थनिषेवणे। त्रितावाले
कर्मानाते। नमोपिविष्णुसुमापतिं। सान्निध्यंकुरुदेवेशसागरेलवणांभसि। अग्निश्चयोनिरनि
लाचदेहानतोधाविष्णुरमृतस्यनाभिः। एतद्ब्रुवन्पांडवसत्यवाक्यंततोवगाहेतपतिंनदीनामिति
गनते। क्षीरेणान्यूठीतावाविविधरत्नानि। सर्वरत्नोनवत्सु श्रीमान्सर्वरत्नाकरोयतः। सर्वरत्नप्रधान
रत्नैर्गृहाणार्घ्यंमहोदधे। इत्यर्घ्यंदत्वासंतर्पयेत्। यथोक्तंपृथ्वीचंद्रोदयेस्कांदे। पिप्पला

[illegible] एवं कृतांतेजीवके पुरी। [illegible] वसिष्ठ वामदेवैश्च पराशरं सुमन्त्रपति [illegible] वाल्मीकिना
[illegible] पवनात्करवील्यांस्त देवचानकैनीलैगवाक्षैश्च गवयैर्गंधमादनैः [illegible] वैतैस्तु
मैर्तैस्सुग्रीवं चांगदंस्तथा। मैंदंच द्विविदंचैव वृषकैश्रारनैतया। रामचंद्रैरणमैव
[illegible] स्विनी। एतोस्तत्पर्यद्विद्वान्नक्तमध्ये विशेषतः। आब्रह्मस्तंबे
[illegible] चराचरं। मयादत्तेनतोयेन तृप्तिमेवाभिगच्छत्विति [illegible]
[illegible] ॥ इति श्रीमत्तद्ववाद्यप्रमाणपारावारपारीणभ
ट्टरामकृष्णसूनुदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधो
प्रथमः परिछेदः ॥ ॥ श्रीरामभद्रायनमः। ॥

264